# www.ALL SANSKRIT.com

**BEST SANSKRIT WEBSITE FOR PEOPLE OF ALL AGES**

www.allsanskrit.com presents

अपठितश्लोकाधारितप्रश्नाः (CBSE CLASS X SANSKRIT QUESTIONS ON UNSEEN SHLOKAS )

श्लोकः - १

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

१.उदारचरितानां किम् कुटुम्बकम् भवति?----------
२.लघुचेतसाम् गणना कथं भवति?------------------
३."परः" इति पदस्य विलोमपदं चित्वा लिखत। ---------
४.वसुधैव = ------- + --------
५."परिवारः" इति अर्थे कः शब्दः प्रतुक्तः?----------

**********************************************************************

श्लोकः-२

अधमा धनमिच्छन्ति धनमानौ च मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम्॥

६.अधमाः किम् इच्छन्ति?------------
७.धनमानौ के इच्छन्ति?-------------
८.उत्तमाः किम् इच्छन्ति?------------
९.महतां धनम् किम् भवति? --------
१०."धनमानौ" इति पदस्य विग्रहवाक्यं किम्?----------------
(अ)धनम् मानः च (ब)धनः मानम् च (स)धनाय मानः (द)धनम् च मानम् च
११."महताम्" इति पदे का विभक्ति?------------
(अ)चतुर्थी (ब)पञ्चमी (स)षष्ठी (द) सप्तमी

**********************************************************************

श्लोकः -३

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

१२.किं किं नैव तुल्यम्?----------------------

१३.स्वदेशे कः पूज्यते?----------------

१४विद्वान् कुत्र पूज्यते?-----------------

१५."समानम्" इति अर्थे कः शब्दः प्रयुक्तः?-------

१६."मूर्खः" इति शब्दस्य विलोमपदं चित्वा लिखत।-----

*******************************************************************

श्लोकः -४

नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनाः।

शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन॥

१७.के नमन्ति?---------------------------

१८.के न नमन्ति?-----------------------

१९.गुणिनः जनाः किं कुर्वन्ति?-----------

श्लोकः -५

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥

२०.धीमतां कालः कथं गच्छति?----------------------------------
२१.मूर्खाणां कालः कथं गच्छति?----------------------------------
२२."बुध्दिमताम्" इति अर्थे कः शब्दः प्रयुक्तः?-----------

श्लोकः -६
अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत्।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्॥

२३.प्राज्ञः किं किं साधयेत्?--------------------------------
२४.कथं साधयेत्?-----------------------------------------
२५.क्षणत्यागे का न प्राप्यते?----------
२६.कस्य त्यागेन धनं न प्राप्यते?----------

श्लोकः -७
परोपकाराय फलन्ति वृक्षा परोपकाराय दुहन्ति गावः।
परोपकाराय वहन्ति नद्यः परोपकाराय सतां विभूतयः॥
२७.परोपकाराय के फलन्ति?-----------

२८.गावः किमर्थं दुहन्ति?------------

२९.नद्यः परोपकाराय किं कुर्वन्ति?----------
३०.सताम् विभूतयः किमर्थं भवन्ति?--------
३१."नद्यः" इति शब्दे का विभक्तिः?--------
(अ) द्वितीया (ब) प्रथमा (स) तृतीया (द) चतुर्थी

श्लोकः -८
छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षा सत्पुरुषा इव॥

३२.वृक्षाः कस्य छायां कुर्वन्ति?----------
३३.ते स्वयं कुत्र तिष्ठन्ति?-----------
३४.फलानि किमर्थं भवन्ति?-------
३५.वृक्षाः के इव भवन्ति?----------

श्लोकः -९
विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥

३६.विद्या किं ददाति?----------------
३७.पात्रताम् कस्मात् याति?--------------
३८.धनं कस्मात् आप्नोति?--------------
३९.धनात् किं लभते?-------------
४०."विनम्रता" इति अर्थे कः शब्दः प्रयुक्तः?--------
४१.सुखम् कस्मात् लभते?-------------
४२."योग्यता" इति अर्थे कः शब्दः प्रयुक्तः?--------

श्लोकः -१०
आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वायं नावसीदति॥

४३.आलस्यं किं भवति? -----------
४४.महारिपुः कः भवति?-----------
४५.उद्यमसमः कः नास्ति?----------

श्लोकः -११
उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥

४६.आत्मानं केन उद्धरेत्?---------
४७.कम् न अवसादयेत्?---------
४८.आत्मनः बन्धुः कः भवति?-------
४९.आत्मैव कस्य रिपुः भवति?--------
५०."शत्रुः" इति अर्थे कः शब्दः प्रयुक्तः?---------

श्लोकः -१२
मणिना वलयं वलयेन मणिः मणिना वलयेन विभाति करः।
कविना च विभुः विभुना च कविः कविना विभुना च विभाति सभा॥

५१.मणिना किं विभाति? ---------------
५२.मणि: केन विभाति? ------------------
५३.कर: कथं विभाति?----------------------------------------
५४.कविना क: विभाति?------------------
५५.विभु: केन विभाति?-------------
५६.सभा कथं विभाति?---------------------------------------

श्लोक: -१३
अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।
परोपकार: पुण्याय पापाय परपीडनम् ॥

५७.कस्य वचनद्वयम्?-------------
५८.परोपकार: किमर्थं भवति?----------
५९.किं पापाय भवति? ----------------

श्लोक: -१४
पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढै: पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।

६०.पृथिव्यां कति रत्नानि?-----------
६१.रत्नानि कानि?------, -------. ---------
६२.कै: रत्नसज्ञा विधीयते?--------
६३.मूढै: केषु रत्नसज्ञा विधीयते?-------------
६४."नाम" इति अर्थे क: शब्द: प्रयुक्त:?-------
६५."शिला" इति अर्थे क: शब्द: प्रयुक्त:?---------

श्लोक:-१५
उद्यमेन हि सिध्यन्ति कार्यणि न मनोरथै: ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगा: ।।

६६.उद्यमेन कानि सिध्यन्ति? --------------
६७.कार्याणि केन सिध्यन्ति? ----------------
६८.मनोरथै: कानि न सिध्यन्ति? -----------
६९."प्रयत्नेन" इति अर्थे क: शब्द: प्रयुक्त:?-------
७०.सुप्तस्य सिंहस्य मुखे के न प्रविशन्ति?--------

श्लोक: -१६
नरस्य आभरणं रूपं रूपस्य आभरणं गुण: ।
गुणस्य आभरणं ज्ञानं ज्ञानस्य आभरणं क्षमा ।।

७१.नरस्य आभरणं किम्? ---------
७२.गुण: कस्य आभरणं भवति? -------
७३.गुणस्य आभरणं किम्? -------
७४. ज्ञानस्य आभरणं किम्?-------

श्लोक: -१७
चन्दनं शीतलं लोके चंदनादपि चंद्रमा: ।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसंगति: ।।

७५.लोके किं शीतलम्?---------
७६.चन्दनं कीदृशम् भवति?------
७७.चन्दनादपि क: शीतल: भवति?--------
७८. चन्द्रचन्दनयोर्मध्ये का शीतला भवति? ------
७९."मित्रता" इति अर्थे क: शब्द: प्रयुक्त:?-------

श्लोक: -१८
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेत् वाचं मन: पूतं समाचरेत् ।।
८०.दृष्टिपूतं किं न्यसेत्? ------------
८१.कीदृशं जलं पिबेत्? ------------
८२कीदृशीम् वाचं वदेत्?-------------
८३. मन: पूतं किं कुर्यात्? ------------
८४."पवित्रम् " इति अर्थे क: शब्द: प्रयुक्त:?---------

श्लोक: -१९
विद्या विवादाय धनं मदाय शक्ति: परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय॥

८५.खलस्य विद्या किमर्थं भवति?--------------
८६.खल धनं किमर्थं भवति? -------------
८७.खलस्य शक्ति: किमर्थं भवति?--------------
८८.कस्यस्थ शक्ति : रक्षणाय भवति? ----------------
८९.साधो: धनं किमर्थं भवति?-----------------
९०.कस्य विद्या ज्ञानाय भवति? --------------

श्लोक: -२०
भाषासु मुख्या मधुरा, दिव्या ग्वाण भारती .
तस्माद्धिः काव्यं मधुरं, तस्मादपि सुभाषितम्

९१.भाषासु मुख्या का अस्ति?------------
९२.दिव्या का अस्ति?-----------
९३.तस्मात् किं मधुरम्?----------
९४.काव्यात् अपि मधुरं किम्?----------

श्लोक: -२१
उदये सविता रक्त: रक्तश्च अस्तमये तथा।
संपत्तौ च विपत्तौ च महतां एकरूपता॥

९५.उदये सविता कीदृश:? ----------

९६.कः अस्तमये रक्तः?---------------
९७.महतां कदा एकरूपता भवति? ----------
९८."सूर्यः" इति अर्थे कः शब्दः प्रयुक्तः?--------
९९"उदये" इति शब्दस्य कः विलोमः प्रयुक्तः?-------

श्लोकः- २२
न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥

१००.सर्वधनप्रधानं किम्?---------
१०१.न चौरहार्यं किम्?-----------
१०२.व्यये कृते विद्याधनस्य किं भवति? ------
१०३.विद्याधनं कीदृशम्?------------
१०४."प्रतिदिनम्" इति अर्थे कः शब्दः प्रयुक्तः?-----------
१०५."विद्याधनम्" इति शब्दस्य विशेषणं किं प्रयुक्तम्? --------
१०६."मुख्यम्" इति अर्थे कः शब्दः प्रयुक्तः?-----------
१०७विद्याधनं कथं वर्धते?----------
१०८.."क्षीयते" इति शब्दस्य विलोमपदं चित्वा लिखत।--------

## उत्तराणि

१.वसुधा एव

२.अयं निजः परः इति

३.निजः
४.वसुधा + एव

५.कुटुम्बकम्६.धनम् ७.उत्तमाः८.मानम्
९.मानः

१०. (अ) धनम् मानः च

११. (स) षष्ठी

१२.विद्वत्वं च नृपत्वं च

१३.राजा १४.सर्वत्र

१५.तुल्यम्
१६.विद्वान्

१७.फलिनो वृक्षाः/गुणिनो जनाः

१८.शुष्कवृक्षाः/मूर्खाः

१९.नमन्ति

२०.काव्यसास्त्रविनोदेन

२१. निद्रया कलहेन वा

२२. धीमताम्

२३. विद्यामर्थं च

२४. अजरामरवत्
२५. विद्या

२६. क्षणस्य२७. वृक्षा: २८. परोपकाराय
२९.

३०. परोपकाराय

३१. प्रथमा

३२. अन्यस्य
३३. आतपे

३४. परार्थाय

३५. सत्पुरुषा:

३६. विनयम्

३७. विनयात्

३८. पात्रत्वात्

३९. धर्म:

४०. विनयम्

४१. धर्मात्

४२. पात्रता

४३. शरीरस्थ: महारिपु:

४४. आलस्यम्

४५. बन्धु:
४६. आत्मना

४७. आत्मानम्

४८. आत्मा एव

४९. आत्मन:

५०. रिपु:

५१. वलयम्

५२. वलयेन

५३. मणिना वलयेन च करः विभाति।

५४. विभुः

५५. कविना

५६. कविना विभुना च सभा विभाति।

५७. व्यासस्य

५८. पुण्याय

५९. परपीडनम्

६०. त्रीणि

६१. जलम् , अन्नम् , सुभाषितम्

६२. मूढैः

६३. पाषाणखण्डेषु

६४. संज्ञा

६५. पाषाणम्

६६. कार्याणि

६७. उद्यमेन

६८. कार्याणि

६९. उद्यमेन

७०. मृगाः

७१. रूपम्

७२. रूपस्य

७३. ज्ञानम्

७४. क्षमा

७५. चन्दनं

७६. शीतलम्

७७. चंद्रमाः

७८. साधुसंगतिः

७९ संगतिः

८०.पादम्

८१.वस्त्रपूतं

८२.सत्यपूतां

८३.समाचरेत्

८४.पूतम्
८५.विवादाय

८६.मदाय

८७.परेषां परिपीडनाय

८८.साधोः

८९.दानाय

९०.साधोः
९१.गीर्वाण भारती

९२.गीर्वाण भारती

९३.काव्यं

९४.सुभाषितम्
९५.रक्तः

९६.सविता

९७.सम्पत्तौ च विपत्तौ च

९८.सविता९९.अस्तमये

१००.विद्याधनम्
१०१.विद्याधनम्

१०२.वर्धते

१०३.न चौरहार्यम्.न राजहार्यम्,न भ्रातृभाज्यम् ,न च भारकारि च

१०४.नित्यम्

१०५.सर्वधनप्रधानम्

१०६.प्रधानम्

१०७.व्ययेकृते

१०८.वर्धते

==========================================================================================
COLLECTION OF EXAM QUESTIONS
==========================================================================================